ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# जन्मबन्धस्वरूपविचारः

**दीपकमण्डलः**

**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नई दिल्ली-११००१६**

प्रमाणप्रमेयादिषोडशपदार्थतत्त्वज्ञानान्मुक्तिर्भवतीति नैयायिकानांसिद्धान्तः। परन्तु तत्र शङ्का उदेति किं तत्त्वज्ञानाव्यवहितोत्तरक्षणे मुक्तिर्भवति उत अन्यः कश्चिद्व्यापारो भवति? "निःश्रेयसाधिगमः - अपवर्गप्राप्तिः। तत् खलु निःश्रेयसः किं तत्त्वज्ञानानन्तरमेव भवति? नेत्युच्यते, किं तर्हि? तत्त्वज्ञानात्"[1] अर्थात् तत्त्वज्ञानान्तरमेव मोक्षो भवतीति नियमो नास्ति। तत्त्वज्ञानानन्तरं प्रारब्धकर्मफलानां भोगे जाते मोक्षो भवतीत्यर्थः। तथा च श्रुतिः "तस्य तावदेवचिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति। स्मृतिश्च "नायुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति। तत्त्वज्ञानाद् मिथ्याज्ञानादिनिवृत्तौ दोषादिदुःखान्तनिवृत्त्यापवर्गो भवति। अतः सूत्रकारः तत्त्वज्ञानादपवर्गप्राप्तिप्रकारं सूत्रयति- "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः"[2] इति। पदार्थतत्त्वज्ञानान्मिथ्याज्ञानस्य नाशः, मिथ्याज्ञानापाये रागद्वेषादिदोषापायः, मिथ्याज्ञानस्य दोषकारणत्वात् कारणनिवृत्तौ कार्यनिवृत्तेः प्रसिद्धत्वात्। दोषापाये धर्माधर्मलक्षणप्रवृत्तेरपायः, दोषाणां प्रवृत्तिकारणत्वात्। प्रवृत्तेरेव जन्मकारणत्वात् प्रवृत्त्यपाये जन्मापायः, जन्म शरीरसम्बन्धविशेषः। शरीरसम्बन्धमन्तरा दुःखनिवृत्तिरूपत्वात् जन्मन एव दुःखमूलत्वात् दुःखनाशे अपवर्गः मोक्षो भवति। अत्र सूत्रे जन्मशब्दस्य यः प्रयोगः दृश्यते तस्य किं स्वरूपमिति जिज्ञासायामुच्यते।

वस्तुतः अत्र सूत्रे जन्मशब्दस्यार्थः शरीरसम्बन्धः। भाष्यकारैस्तावत् जन्मनः लक्षणं कृतम्- "जन्म पुनः शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः" इति। अर्थात् शरीरेन्द्रियबुद्धीनां परस्परसम्बद्धानां यः प्रादुर्भावः स जन्म इति। गर्भतो मृतशरीरोत्पत्तावपि जन्मशब्दप्रयोगाभावात् शरीरादीनां परस्परसम्बद्धत्वं विशेषणम्। न्यायवार्तिककारैः प्रश्नमुखेन जन्मन इत्थं लक्षणं कृतम्-"किं पुनरात्मनो जन्म? निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिरपूर्वाभिरभि-सम्बन्धः"[3] इति। वाचस्पतिमिश्रैरपि सांख्यतत्त्वकौमुद्याम् ऊनविंशतिकारिकायाः जन्मस्वरूपनिरूपणावसरे निकायशब्दस्य प्रयोगः कृतः। न्यायवार्तिकस्य

---

1 न्याभा. पृ.-13

2 न्या. सू., 1/1/2

3 न्या. वा., 3/1/1 सू. व्या., पृ. - 339-340

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

व्याख्यानावसरे मिश्रैरुच्यते -"निकायो देवमनुष्यतिर्यगादीनामनौत्तराधार्येणावस्थितः संघातः तद्विशिष्टाभिरित्यर्थः" इति। प्रवृत्तिसाधनौ धर्माधर्मौ कुत्सितस्याऽभिपूजितस्य च पूजितस्य च जन्मनः कारणम्। गौतमवृत्तौ विजातीयशरीराद्यप्राणसंयोगः जन्म इति जन्मलक्षणं प्रतिपादितं विद्यते।

**बन्धस्वरूपम्**

मोक्षशब्दस्यार्थो भवति बन्धनान्मुक्तिः। बन्धनाभावे सति मुक्तेः सार्थकत्वं नैव सम्भवति। जन्मसद्भावे मृत्योर्विद्यमानत्वम् जन्माभावे मृत्योः सद्भावत्वं कथमपि न सम्भवति। तथाहि- "बन्धत्वमपि चेन्मोक्षो बन्धाभावे क्व मोक्षता। मरणं यदि चेज्जन्म जन्माभावे मृत्युर्न चे"ति[4] श्रुतिः।

बन्धनस्य विद्यमानत्वे च मुक्तेः सद्भावत्वमतो बन्धनस्य नाश एव मुक्तिरिति पर्यवसितम्। बन्धनस्य किं स्वरूपमिति जिज्ञासायामुच्यते श्रुतिः-

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥"[5] इति।

अर्थान्मनसो विषयासक्तत्वमेव बन्धः। वासनया बन्धनमपि बन्धः। तथाहि – "बद्धो हि वासनाबद्धो मोक्षः स्यात् वासनाक्षयः"[6], "पदार्थभावनादार्ढ्यं बन्ध इत्यभिधीयते"[7] "द्रष्टुर्दृश्यस्य सत्ताऽत्र बन्ध इत्यभिधीयते"[8], "देहोऽयमिति संकल्पस्तद्बन्ध इति चोच्यत"[9] इति। एवञ्च देहादावात्मनोऽभिमानं बन्धस्तन्निवृत्तिश्च मोक्षः। प्रतिपादितमस्ति यत्- "अनात्मानं देहादीनामात्मत्वेनाभिमन्यते सोऽभिमान आत्मनो बन्धस्तन्निवृत्तिर्मोक्ष"[10] इति। पद्मपुराणे तावत् कर्मण उत्पत्तिर्बन्धः, सुखदुःखदायककर्मनाशश्च मोक्ष इति वर्णितम्।

"कर्मणाञ्च लयो मोक्षः सुखदुःखप्रदायिनाम्।
तदुत्पत्तिस्तु बन्धः स्यादित्यसौ शास्त्रनिर्णयः॥"[11] इति।

ऐतरेयोपनिषदि च- "भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष उच्यत"[12] इत्युपलभ्यते। एतेन ज्ञायते यद्बन्धस्य सद्भावे मोक्षस्य सिद्धिः। बन्धनाभावे मोक्षस्य स्थितिरेव नास्तीति शास्त्रकारैर्यत्प्रपञ्चितं तत् सत्यमिति मे भाति।

तत्र नैयायिका इत्थं प्रतिपादयन्ति- यथोपनिषत्प्रमाणं स्वीकृत्य बन्धस्य सत्ता मोक्षार्थं स्वीकुर्वन्ति तथैव नैयायिकैरपि स्वीक्रियते। तथाहि प्रमाणादितत्त्वज्ञानानन्तरं साक्षान्मोक्षो नैव सम्भवत्यपि तु मिथ्यादिज्ञानानामपाये सति मोक्षः सम्भवति। उक्तञ्चसूत्रकारेण- "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग"[13] इति। एतेन परिचीयते

4 तेजोबिन्दूपनिषत् - 5/24

5 ब्रताबिन्दूपनिषत् - 3/2

6 मुक्तिकोपनिषत् - 2/6/8

7 महोपनिषत् - 2/41

8 योगवासिष्ठम् - 3/1/22

9 तेजोबिन्दूपनिषत् - 5/90

10 सर्वसारोपनिषत्- 1

11 पापुराणम् उत्तरखण्ड :- 204/23

12 ऐतरेयोपनिषत् - 4/35/3

13 न्यायसूत्रम् - 1/1/2

यदिह खलु जगद्दुःखपङ्कनिमग्नं भवति तत्रैकविंशतिदुःखानामात्यन्तिकी निवृत्तिर्मोक्षः। तादृशदुःखानामवाप्तिस्तु बन्धनात् सम्भवति। सत्यां बन्धननिवृत्तौ मोक्षस्य प्राप्तिः। अत एव भाष्यकारैः प्रतिपादितं यत्- “नित्यसुखरागस्याऽप्रहाणे मोक्षाधिगमाभावो रागस्य बन्धनसमाज्ञानादि”[14]ति।

अर्थात् बन्धनमोक्षयोरेकत्र विरुद्धत्वाद्बन्धनसमाज्ञातो हि रागः। न च बन्धने सत्यपि कश्चिन्मुक्त इत्युपपद्यते। अत एव बन्धनविषये श्रुतिवाक्यैर्यत् साधितं तदेव नैयायिकैरप्यभ्युपगतमिति। तथा च मिथ्याज्ञानादिदुःखान्तः संसारो बन्धः[15]।

ꕥꕥꕥ

[14] न्यायभाष्यम् - 1 / 1 /22

[15] न्यायभाष्यम्- 1/1/2